श्रीगणेशायनमः॥ ॥प्रवसतोयजमानइतिसहस्माहबौधायनः सहयजमानःखल्वयंयज
मानःप्रवसतियत्रस्यात्तद्वैनंध्यायेत्सयद्यसंस्थितआगच्छेत्तेनमनुमंत्र्यकर्मांतेनप्रक्रामेदतोहस्मा
हशालिकिःयद्यस्यपुत्रोंतेवासीवालंकर्मणिस्यात्तंतत्रप्रेष्यपेत्सयदिविसंस्थितआगच्छेत्तेनाद्य
प्रक्रामेन्नैववाद्रियेतोभौतेवयजमानभागंप्राश्नीयातामितिहुधे॥यजमानःस्वयंमंत्रांजपेन्नैवच
स्थितः।तद्भागंप्रस्तरेणैवदहेदाहवनीयके॥ध्रुवाज्यात्सर्वपत्नीर्यजुह्वावाजुहुयादिमंइतिगोपालःया
जमानस्यापिविष्णुक्रमणस्याध्वर्यवेपाठात्तावत्कालमध्वर्युःसंनिधानसिद्ध्यर्थइतिविद्यारण्यः॥प्र
वसतियजमानेअध्वर्युणेतत्कार्यमित्येतदर्थमितिभवः॥तथापिक्रियामात्रमध्वर्योःमंत्रास्तुवस्थानस्थि
तस्ययजमानस्यैवेतित्रिकांडमंडनः॥यजमानक्रियाशून्यंदर्विहोमादिकंचन॥उद्देशत्यागमात्रेणया

जमानेनसंयुतं॥कुर्यादवसरमाप्तमृत्विक्पत्नीसमीपतः प्रायश्चित्तप्रदीपे॥ यजमानकर्त्तव्यानिया
निमंत्रोक्तानिकर्माणितेषांस्थानेमंत्रजपंकुर्यात्॥अध्वर्युःकर्मकालेकर्माणिकुर्यात्॥विष्णुक्रमणोत्स
र्पणवर्जंसर्वंकुर्यात्॥यजमानोविष्णुक्रमौत्सर्पणेयत्रस्थितस्तत्रकुर्यात्॥अदृष्टार्थानिकर्माणिलु
प्यंतेदृष्टार्थानिकुर्यात्॥तन्मंत्रजपःकुर्याद्वा॥अस्मिन्नप्यर्थेत्रिकांडवचनानि॥[illegible]यज्ञादिनहोत्रंचप्र
कृतेष्टिंविनेतरत्॥पश्चिष्टिसोमयागादियजमानक्रियान्वितं॥स्वामिनिप्रोषितेनान्यत्स्याहकात्यायनो
मुनिः॥यजमानक्रियाभ्यन्यदविलोमादिकंचन॥उद्देशत्यागमन्त्रेणयजमानेनसंयुतं॥कुर्यादवसरंप्राप्तमृत्वि
क्पत्नीसमीपतः॥पत्न्यारजस्वलायांवाप्रसूतायामथापिवा॥पूर्वमेवनियुक्तःसन्नृत्विक्कुर्याद्यथोदितं॥अ
थाग्निहोत्रंनित्येष्टिंपिंडयज्ञइतित्रयंकर्तव्यंप्रोषितेपत्न्योनान्यत्स्वामिक्रियान्वितं॥स्वाम्यागमनपर्य १

न्तमुत्कृष्टव्यमशेषतः॥यावंतिस्वामिकर्माणिमंत्रोक्तानीतराणिवा॥तेषांनिवृत्तिःसर्वेषांतत्स्थानेजपएवहि॥
विष्णुक्रमोत्सर्पणंचकर्तव्यंचनाभवेत्॥दृष्टप्रयोजनार्थानिस्वामिकर्माणियानितु॥तूष्णीमन्यानिसर्वा
णिकुर्यान्मंत्रांजपेत्सतिः॥अदृष्टार्थानिलुप्यंतेजपेन्मंत्रांश्चतानपि॥अध्वर्युःप्रोषितस्येष्टौयजमानंदि
शिस्मरेत्॥यजमानःस्वयंमंत्रान्जपेत्तत्रैवचस्थितः॥तद्भागंप्रस्तरेणैवदद्देदाहवनीयके॥ध्रुवाज्यात्सर्पु
पत्नीर्यजुर्वायाजुहुयाद्दर्मं॥इतिगोपालः॥सुबोधिन्यां॥यजमानोयाजमानैःप्रवासीचेत्तदाप्यदः॥यजमानं
नकुर्वीतसविष्णुक्रमणैःसहइति॥प्रवसतोयजमानइतिहस्मा॰ उभौ वयजमानभागंप्राश्नीयातामि वे २
ति॥यजमानमंत्रःप्रवसतोयजमानस्यैवजपार्हास्तत्रहेतुमाहसयाजमानइत्यादियाजमानैःसहवर्तनइ
तिसहयजमानःप्रवसतियजमानोयत्रदेशेस्यात्तदायजमानकालेयाजमानंध्यायेत्॥अध्वर्युरितिविशे

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

याज•
२

भः। सहयजमानोयद्यपरिसमाप्तेकर्मणि आगच्छेदागमनात्पूर्वंकृतंकर्मानुमंत्र्यकर्मांतात्कर्मशेषे
णप्रक्रामेत्कर्मशेषेणनुतिष्ठेदित्यर्थः। ष्मा।ति।किमनेनअस्ययजमानस्यपुत्रोंतेवासीवाकर्मणिय
दिसमर्थःस्यात्तत्रयजमानस्थानेतंप्रक्षयेत्। सएवयजमानवदनुमंत्रणादिकुर्यादितिगम्यते। एव
पुत्रोंतेवासीनिवायजमानस्थानेपुत्रेसतितस्यतत्कर्मणिविसंस्थितेअपरिसमाप्तेयजमानआगच्छे।
अत्रयथागमनइतिनिर्धारणपः। विष्णुक्रमान्क्रमतेति। अस्ययाजमानत्वेप्यत्राभिधानमेतावंतंका
लमध्वर्युसंनिधानत्वावश्यकद्योतयितुंकेचित्तुपूर्णपात्रनिनयनविष्णुक्रमणयोर्यजमानयोरप्यत्रा
धानस्यैवप्रयोजनमाहुः। यजमानप्रवासेप्यमंत्रकमेवानयोरनुष्ठानमध्वर्युकर्तृकमथास्यादितिवि २
धारणपः॥ प्रवसतोयाजमानइतिसहयाजमानः प्रवसनइति इहयाजमानंकौयतेमयत्रस्यादेतद्या

जमानंध्यायन्नुच्चारयेत्॥ यागकालेविहाराभिमुखः। अत्रप्रतिपद्यसमाप्तआगच्छेत्। अतिक्रांतविष
ययाजमानमनुमंत्र्यकर्मांतेननतआरभ्यकुर्यात्स्वामिकर्मत्वादन्येनअन्येनअकार्यमितिशालीकेपु
त्रादिर्यदिशक्तस्यात्तत्रानुज्ञापयेद्याजमानंकुर्वीतेतिसकरोतितावदेशस्वयंकरोतितथैवअर्थकृतआग
च्छेत्कृतकृतमेवशेषंकुर्यात्॥ नत्वाद्वियेनएवांतात्कुर्यादितिसंस्यसकर्मणांविदेशस्थअसंभवानदनु
ज्ञानेनकृननेनैवकृतंभवतीतियजमानभागंप्राश्नीयात्तामेकंप्रत्यक्षोयजमानः इतरेणकर्मकृतमितिदृ
ष्टभवः। त्यक्त्वांगुलिमूलकंदस्थानपात्यक्तांगुलात्सर्वतोमुध्येमुष्टिमितंस्त्रुवस्यविधिवद्ध्वत्वाज्यहोमं
चरेत्। वह्निर्वह्निभयंग्राशिस्त्यपरुजंप्राजापतिर्ब्रह्मतनास्ययोनिःप्रभुतांकरोतिहियमोरुद्रथमृत्युंय
मः। एताहस्तमितेस्त्रुवेत्नुचितथामूलात्मूनादेवतामध्येपत्यमातिध्रुवेन्नमरणंमूलेर्थनाशोग्रतः। प

याज०
२

वृमतोयजमानस्यइष्टिकरणेविशेषः।संकल्पऋत्विग्वरणंपत्नीकुर्यात्।अन्यत्सर्वंयाजमानंक्रियारहि
तंअध्वर्युःकुर्यात्।पत्न्यनुज्ञयात्यागोपि।यजमानक्रियाशून्यंमंत्रंजपमात्रंअध्वर्यणाविरोधेनयजमा
नस्थानेगत्वामंत्रजपः।यत्रकर्मणाव्यावृत्तोयजमानासनेगमनमशक्यमितिकृत्वायत्रस्थितःत
त्रैवमंत्रजपःकार्यः।उभयोर्मंत्रयोःसंनिपातोयत्रायातितत्रआर्त्विज्यंबलीयमितिकृत्वापूर्वंआध्व
र्यवंपश्चाद्याजमानं।तत्रविशेषः।व्रतग्रहणमंत्रानूतत्रगत्वाजपः।यजमानेस्थानेगत्वा।भूपतेभु
वनपते०द्वि।यजमानपदरहितं।हविर्निर्वप्स्यामीति।ॐनिर्वपेति।आग्नेयस्यनिर्वापानंतरं।अग्निंहो
तारमिह०।एवमितरयोः।यजमानासनेकस्त्वायुनक्ति।यानिघर्मेत्यस्यावृत्तिः।पुनःस्वस्थानेजपश्च।आ
ज्यग्रहणे।शुक्रंत्वा०पंचानां।त्वा०पंचानांत्वत्तेनां०एवंसर्वत्र।कामायत्वेतिजपः।अनंतरंब्रह्मणेदत्त्वा॥

शुक्रंत्वा०१
सत्वायुनक्तु२

३

गंधर्वोसिविश्वावसु०ध्रुवोसिध्रुवो०एवंसर्वत्र०यानिघर्मेत्यस्यावृत्तिः।भूर्भुवःसुवरित्यस्यावृत्तिः।य
जमानस्थानेयन्मेअग्नेइति।आघारानंतरं।मनोसिप्राजापत्यं०अमर्त्यस्यते०द्वितीयाघारानंतरंवा
गस्यैंद्री०बृहद्भाःइत्यादिप्रयाजयागेअनुमंत्रणानंतरं।आश्रावणादि।एवंसर्वत्र।उपहूतःपशुमानसा
नीत्यस्यावृत्तिः।जुष्टिरसीत्यस्यजपः।यजमानस्थानेब्रध्नपिन्वस्व०।तत्रैव।प्रजापतेर्भागोस्यूर्जस्वा०उज्जि
तिवाचनस्यावृत्तिः।एमाअग्मंनित्यस्यावृत्तिः।स्रुग्व्यूहनेप्रतिमंत्रस्यावृत्तिः।वेदोसीत्यस्यावृत्तिः।तत्स्थाने
गत्वाजपः।आप्यायतांध्रुवा०घृतेनेत्यस्यावृत्तिः।यजमानभागप्राशनकाले।ध्रुवाज्यात्स्रुवपत्नीर्यजुह्वा
जुहुयात्।प्रजापतेत्वमनेनमंत्रेणस्वाहाकारांतेन।पूर्णपात्रविमोकेमंत्राणामावृत्तिः।क्रियाएकैव।यजमान
स्थानेविष्णुक्रमादिब्राह्मणाःस्तर्पयितवाइत्यंतंजपित्वा।पत्न्याअग्न्यन्वनादियज्ञेश्वरार्पणंकुर्यात्।यज

याज०
४

मानैश्रोषिते अध्वर्युणाकर्तव्यामिति। दर्शपूर्णमासयाजमानमंत्रजपान्करिष्ये॥ याःपुरस्ता० विष्टं। पय
स्वती० अग्नेव्रतपते० भूपते भुवनपते० ॐ निर्वप। अग्निं होतार० कस्त्वायुनक्ति० यानिघर्मे० आज्यम
सिसत्य० पंचानांत्वा० ६॥ चरोस्त्वा० ८ भूरस्माकं० ४। कामायत्वा० १ ध्रुवोसि० उग्रोस्युग्रो० अभिभूरस्य० यु
नज्मित्वा० इंधानास्त्वा सु० एताअसदन्।०। यानिघर्मे० भूर्भुवः सुवः। यन्मे अग्ने० उरुकुश्रो० अमर्त्य
स्यते० मनोसिप्राजापत्यं० वागस्यैंद्री० वसंतमृतूनां० ग्रीष्ममृतूनां० वर्षाकृ० शारदमृ० हेमंताशिशिराव०
अग्नीषोम० चक्षु० अग्नेरहंदे० दब्धिरस्य० अग्नीषोमयो० इंद्रस्यवैमृधस्याहं० अग्नेःस्विष्टकृत० अभि
मांदुरिष्टान्० योमांतिदूरेरा० सुरूपवर्ष० उपहूतःपशुमा० जुष्टिरसि० मनोज्योति० ब्रध्नपिन्वस्व० इंद्रं० ४
प्रजापतेर्भागो० बर्हिषोहं० नराशंसस्याहं० अग्नेःस्विष्टकृतोहं० वाजस्यमा० अथासपत्नां इंद्रो०

याज
५

उद्ग्राभंच० अथासपत्नानिं० अग्नेरहमुज्जि० सोमस्याह० अग्नेरह० विष्णोरह० अग्नीषोमयोरह० इं
द्रस्यवैमृधस्या० देवानामाज्यपाना० अग्नेःस्विष्टकृतो० एमाअग्मं० रोहितेनत्वा० वितेमुंचामि० विष्णोः
हं३ शंयो० सोमस्यांदे० सु० त्वष्टुरहंदे० पशूनां रूपंपुषेयं। राकाया० प्र० सिनीवाल्या० प्र० कुह्वाअ० प्र० अ
नुमत्या० प्र० देवानांपत्नीरग्निर्गृहपतिर्यज्ञस्यमिथुनंतयोरहं० वेदोसिवि० आप्यायतांध्रुवा० प्रजापतेर्वि०
द्रुष्टेभ्य० सदसि सन्मेभूयाः स० समुद्रंवः प्र० विष्णुक्रमा क्रमते। विष्णोःक्रमोसि० ४ अगन्मइत्यादिब्रा
ह्मणां स्तर्पयितवै। दर्शेइंद्राग्नियो० न्वारभ्यासं। इंद्राग्नियोरहं० अन्वत्सर्वपौर्णमासवत्। अत्यभ
वःप्रवसत्। इतिइहयाजमानक्रियनेसयच्चस्यात्। तदेनयाजमानध्यायन्उच्चारयेत्। यागकालोविहा ५
राभिमुखः। इतिदर्शपूर्णमासयाजमानंसमाप्तं॥ ॥श्रीः॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

Dr. BHAU DAJI
डाक्टरभाऊदाजीइत्याख्यस्यस्मारकम्
MEMORIAL